संस्कृतवार्ता:

दिनाङ्क :-10.08.2024

प्रात: - 06:55

## प्रधानमन्त्री-वायनाडयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य साहाय्योद्धारकार्याणि पुनर्वासप्रयासान् च समीक्षितुं केरलस्य वायनाडजनपदं प्रति यास्यति। तदनु असौ कन्नूरनगरं प्रति गत्वा तत्र भूस्खलनप्रभावितक्षेत्राणां विमानेन सर्वेक्षणं करिष्यति। श्रीमोदी अत्रान्तरे भूस्खलनप्रभावितक्षेत्राणि अपि अवलोकयिष्यति। यत्र तस्मै आपात्मोचनबलै: विहितप्रयासानां कार्याणां च विषये सूचना प्रदास्यते। पुनर्वासकार्याणां प्रगतिमपि श्रीमोदी द्रक्ष्यति। एतदनन्तरं प्रधानमन्त्री शिबिराणां चिकित्सालयानाञ्च भ्रमणं करिष्यति। यत्र असौ भूस्खलनेन पीडितजनै: सह मिलित्वा तेषाञ्च स्वास्थ्यविषये वार्तां साधयिष्यति। तदनन्तरं श्रीमोदी एकं समीक्षोपवेशनं विधास्यति यत्र तस्मै घटनानां प्रचाल्यमाणां साहाय्यप्रसायानाञ्च सन्दर्भे सविस्तारं सूचना प्रदास्यते।

## रेलपरियोजनानुमति:

प्रधानमन्त्रिण: श्रीमोदिन: अध्यक्षतायाम् आर्थिकविषयक-मन्त्रिमण्डल-समित्या रेलमन्त्रालयस्य अष्ट परियोजना: अनुमोदिता:। यासां समग्रमूल्यं सप्तपञ्चाशदधिकषड्शतोत्तर-चतुर्विंशतिसहस्रकोटिरूप्यकाणि सन्ति। उपवेशनान्तरं नवदिल्ल्यां वाताहरेभ्य: सूचनां प्रददन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: प्रख्यापितवान् यत् अनुमोदितपरियोजनासु सप्तराज्यानां चतुर्दशजनपदा: सम्मिलिता: विद्यन्ते। ओडिशा-महाराष्ट्र-आन्ध्रप्रदेश-झारखण्ड-बिहार-तेलङ्गाना-पश्चिमबङ्गालराज्येभ्य: आभि: परियोजनाभि: गतिं मेलिष्यति। अपि च आकांक्षिण: जनपदा: आदिवासिक्षेत्राण्यपि विकसिता: भविष्यन्ति।

मन्त्रिमण्डलावास:

केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्रि-आवास-योजनाया: द्वितीयनगरीयसंस्करणम् अनुमोदितम्। केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णव: प्रोक्तवान् यत् अस्या: योजनाया: अन्तर्गतं त्रिकोटि: नवीनानि गृहाणि निर्मास्यन्ते। श्रीवैष्णव: स्पष्टीकृतवान् यत् एतेषु द्विकोटि: गृहाणि ग्रामीणक्षेत्रेभ्य: तत्रैव एककोटि: नगरीयक्षेत्रेषु निर्मास्यन्ते।

लोकसभाध्यक्ष:

लोकसभाध्यक्षेण ओम्बिरलाइत्यनेन ह्य: संसत्भवनपरिसरे अष्टादश्या: लोकसभाया: नवनिर्वाचितसांसदेभ्य: आयोजितस्य अभिविन्यासस्य कार्यक्रमस्य उद्घाटनं विहितम्। अत्रावसरे श्रीबिरलाइत्येष: न्यगादीत् यत् अध्यक्ष: चित्तवृत्ते: उत वा दलानां आधारे कार्यं न करोति अपितु सत्यम् इदमस्ति यत् अध्यक्ष: संसत्सदस्यानाम् अधिकारान् संरक्षयति। असौ भणितवान् यत् नवनिर्वाचिता: सदस्या: नवीनविचारै: सह अनुभविसदस्यानां समन्वयेन लोकसभाया: कार्याचरणे गुणवत्तां संवर्धयिष्यन्ति ।

पेरिसोलम्पिकक्रीडा

पेरिसोलम्पिकक्रीडायां भारतीयमल्लयोद्धा एकविंशतिवर्षीय: अमन सेहरावत: पुरुषाणां सप्तपञ्चाशत्किलोग्रामभारवर्गे ह्य: कांस्यपदकं समर्जितवान्। पदकमिदं भारतस्य षष्ठमं पदकमस्ति। राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीपधनखड़: प्रधानमन्त्री च नरेन्द्रमोदी भारतीयमल्लयोद्धे अमनसेहरावताय वर्धापनानि अयच्छन्।

ऋतुविज्ञान विभाग:

भारत-ऋतु विज्ञान-विभागेन आगामिन: षड्दिनानि यावत् देशस्य विभिन्नेषु भागेषु अतिवृष्टे: सम्भावना अभिव्यक्ता।

विभागानुसारि सप्ताहपर्यन्तं पूर्वोत्तरीय-पश्चिमी-उप-हिमालय क्षेत्रेषु विद्युत्प्रकाशनेन: ध्वनिना च सह महती वृष्टि: भविष्यति। विभागेन इदमपि पूर्वानुमानितं यत् देशस्य पूर्वीयभागा: अपि आगामिषु त्रिषु चतुर्षु च दिवसेषु तद्वदेव महतीवृष्टे: साम्मुख्यं करिष्यन्ति।

।।इति वार्ता:।।